This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कै. वे. मं. धोरशास्त्री [illegible]

(फक्त २ रे पान नाही बाकी संपूर्ण)

॥ प्रागभावविचारः ॥

॥ प्रारंभ ॥

Acc. NO. ~~3643~~. M-1615

Title - प्रागभावविचारः

Author - ?

Date - ?

Subject - न्याय.

folio - 11 (Nos. 2 folio is missing).

Xerox - 20.

Checked 2012

KKSU LIBRARY RAMTEK 441 106 M-1615 Dist Nagpur



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वितीय

श्रीगणेशायनमः ॥ ॥अथप्रागभावेकिंमानं॰ नतावदध्यक्षं इहेदानींघटप्रागभावइति प्रत्यक्षासिद्धेः
घटोभविष्यतीति प्रत्यक्षस्यच वर्त्तमानकालोत्तरकालोत्पत्तिकत्वावलंबनत्वेनैवोपपत्तेः। प्रागभावासाध
कत्वात्॰ नचाभावत्वं विनाशित्वं निपदार्थविभाजकोपाधित्वात् भाववदित्यनुमानात्तत्सिद्धिरितिवाच्यं॰
साध्यानुमानस्याप्रयोजकत्वात्॰ अथ प्रागभावानंगीकारेउत्पन्नस्यपुनरुत्पादापत्तिः। सामग्रीसत्त्वा
त्॰ तदंगीकारेतु तस्यप्रतियोग्युत्पत्तिकालेएव विनाशात्तद्घटितसामग्र्यभावेननापत्तिः। नचोत्पत्तिपुन
रुत्पादस्तदुत्पादोत्तरकालीनस्तदुत्पादः सचनापादयितुंशक्यते अप्रसिद्धत्वा दितिवाच्यं। तद्घट
ध्युत्पत्त्युत्तरक्षणादिकंपक्षीकृत्यैतत्सामग्र्यव्यवहितोत्तरत्वेनप्रथमक्षणेप्रसिद्धस्यतदुत्पादस्यैवा
पादनीयत्वात्॰ तदाकारश्च एतद्घटाद्युत्पत्तिक्षणः यद्येतद्घटसामग्र्यव्यवहितोत्तरस्यादेतद्घटोत्पा
दवान्स्यादितिचेन्न। योयद्धर्मावच्छिन्नसामग्र्यव्यवहितोत्तरक्षणः सतदवच्छिन्नोत्पादवानितिसेतादृश
सामग्रीव्याप्तेरेवनास्त्युपेयते॰ येनतद्बलादुत्पत्तिरापादनीया। योयद्धर्मावच्छिन्नसामग्र्यव्यवहितोत्तरः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वात्·न च भाविखंडघटादीनां महाघटोत्पत्तिकाले तत्पादयारणायत्तत्र महाघटादिनाशस्य हेतुताया
आवश्यकत्वाद्द्वितीयक्षणोत्पत्तिदापत्तिवारणसंभवात्किंद्रव्याभावहेतुतयेतिवाच्यं। यदा महाघटसत्त्वे
एव तदारंभककपाले कपालांतरसंयोगः तदनंतरं घटनाशः ततः संयुक्तकपालसहिते महाघटा
रंभककपालैः खंडघटारंभस्तत्र महाघटोत्पत्तिकाले खंडघटहेतुत्वं तदुत्पन्नसंयोगविरहेणापत्ति
विरहात्·महाघटनाशस्य हेतुताया अनावश्यकत्वात्·द्वितीयादिक्षणे आपत्तिवारणाय द्रव्याभाव
हेतुताया आवश्यकत्वात्·न च द्रव्याभावहेतुत्वमुभयवादिसिद्धं·तथापि तत्तद्घटं प्रति तत्तद्घ
टनाशाभावहेतुत्वापेक्षया प्रागभावहेतुत्वमेवोचितं·तत्तद्घटनाशाभावहेतुत्वे तत्तद्घटनाश
कालोत्पन्नपदार्थांतरनाशाभावमादाय विनिगमनाविरहादिति वाच्यं। तन्मतेपि तत्तद्घटसम
नकालोत्पन्नपदार्थांतरप्रागभावमादाय विनिगमनाविरहसंभवादिति। एतेन ज्ञानादिस्थेपुत्प



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राग०
२

न पुनरुत्पादोत्तरक्षणे निरस्तः । स्योत्पत्तिद्वितीयतृतीयक्षणे तदुत्पत्त्यागतत्तद्व्यक्तित्वावच्छिन्नं प्रति तत्तद्व्य
क्तित्वेन प्रतिबन्धकत्वाभ्युपगमेन वारणीयत्वात् । चतुर्थादिक्षणे तदुत्पादस्य तत्तद्व्यक्तित्वावच्छिन्न
जनकतावच्छेदकीभूत तत्तद्व्यक्तित्वावच्छिन्नविशेषणज्ञानविरहेणापादनासंभवात् । प्रागभावहे
तुत्वेपि तत्तद्व्यक्तेः पूर्वमुत्पादवारणाय विशेषणज्ञानादीनां तत्त्वेन हेतुताया आवश्यकत्वात् । न च धा
रावाहिकस्थले निर्विकल्पकस्यैव चतुर्थादिक्षणेऽऽपत्तिवारणाय प्रागभावहेतुत्वमावश्यकं । तत्रापि वि
शेषणज्ञानादीनामहेतुत्वात् । चक्षुःसंयोगादीनां तृतीयक्षणेपि सत्त्वादिति वाच्यं । तत्र तत्तत्प्राग्भा
वस्यापि हेतुत्वोपगमात् । न च तत्तद्व्यक्तित्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वावच्छिन्नाभावस्य नाशत्वावच्छि
न्नाभावस्य चोभयकारणत्वकल्पनापेक्षया तत्तद्व्यक्तित्वावच्छिन्नं प्रति तत्तद्व्यक्तिप्रागभावत्वेनै रामः
कैकमेव हेतुत्वमेवोचितमिति वाच्यं । प्रागभावहेतुत्वेपि व्यक्तिरिक्तप्रागभावतदनन्यथासिद्धत्व
नियतपूर्ववर्त्तित्वयोः कल्पनीयतया क्लृप्तयोः क्लृप्तनियतपूर्ववृत्तित्वयोरन्यथासिद्धत्वकल्पनाया एवो २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चितत्वात्· अथकालिकसंबंधेन तज्ज्ञानाधिकरणध्वंसस्यैकमेव प्रतिबंधकत्वं कल्प्यते तत एव तत्ती
यक्षणादौ न तदापत्तिः। न च द्वितीये तदापत्तिरिति वाच्यं। उत्पत्संतर्भावेण सामग्रीव्याप्तेरनभ्युपगमा
त्· तद्धत्वस्य च तदानीमिष्टत्वात्· अस्तु वा तादृशध्वंसाभावस्य कार्यसहभावेन हेतुता अतद्धस्य
तर्भावेन सामग्रीव्याप्तेरभ्युपगमेऽपि द्वितीयादिक्षणे न तदुत्पादापत्तिः। तदधिकरणसमयध्वंस
स्य तदानीं सत्त्वात्· वस्तुतस्तु सामान्यतो निष्प्रकारकतद्विषयकज्ञानत्वावच्छिन्नं प्रति तद्विषयक
ज्ञानत्वेन प्रतिबंधकत्वकल्पनात् विशिष्टबुद्ध्यादिक्षणे न तदापत्तिः संभवतीति ध्येयं यत्तु उ
त्पन्नतत्त्वज्ञानस्य धर्माधर्मोत्पादकारणाभावादृष्टत्वावच्छिन्नं प्रति आद्यतत्त्वज्ञानप्रागभावत्वेन हे
तुतया प्रागभावसिद्धिः। आद्यत्वं च नु स्वसमानाधिकरणतत्त्वज्ञानाधिकरणसमयध्वंसासमानकाली
नत्वं· स्वत्वाननुगमात्· भेदकूटनिवेशे चासंततगौरवात्· किंतु स्वसमानाधिकरणस्वाधिकरणसम
यध्वंसवत्त्वोभयसंबंधेन तत्त्वज्ञानवद्भिन्नत्वं। वस्तुतस्तु स्वसामानाधिकरण्यकालिकविशेषणताव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राग०भा ४ छिन्नस्वरात्तित्वोभयसंबंधेन तत्त्वज्ञानवदन्यत्वं प्रागभावे विशेषणीयं। तदप्यसत्। तत्त्वज्ञानध्वं
सप्रतिबंधकतामभ्युपगम्य तत्त्वज्ञानवत्तामदृष्टवारणासंभवात्। अथैवं तत्त्वज्ञानोत्पादक्षणोत्तरद्वितीय
क्षणे चादृष्टोत्पत्त्यापत्तिः। न च तत्त्वज्ञानोत्पत्तिकाले भवन्मतेऽपि तदुत्पादप्रसंग इति वाच्यं। तादृश
प्रागभावस्य कार्यसहत्वेन हेतुत्वोपगमादिति चेन्न। तत्त्वज्ञानध्वंसस्यैव तत्त्वज्ञानस्यापि प्रतिबंध
कत्वोपगमात्। एवमपि पूर्वोक्तरीत्याकल्पनालाघवसंभवात्तादृशतत्त्वज्ञानत्ववदन्यत्वज्ञानप्रागभा
ववत्त्वादीनां हेतुत्वे तत्त्वज्ञानवदन्यत्वप्रागभावयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण का
रणत्वस्य भवन्मतेऽप्यावश्यकत्वाच्च। वस्तुतस्तु अदृष्टत्वावच्छिन्नं प्रति वासनात्वेनैव हेतुत्वं कल्प
ते। अतो न तत्त्वज्ञानं विना धर्माद्युत्पत्तिः। तत्त्वज्ञानेन वासनानाशात्। वासनात्वं च मिथ्याज्ञानजन्य
संस्कारगतो जातिविशेषः। न च यदृत्तरत्वजात्या सांकर्यमिति वाच्यं। तादृशजातौ मानाभावात्। एवं च राम० ४
तत्त्वज्ञानाभावहेतुतापि न स्वीक्रियते। वासनायाः कार्यसहभावेनैव हेतुत्वोपगमात्। तत्त्वज्ञानोत्पत्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सो द्वितीयक्षण एवैतत्पांशोर्नैन द्वितीयादिक्षणेऽदृष्टोत्पत्त्यसंभवात्· प्रथमक्षणेऽदृष्टोत्पादाभ्युपगमेऽक्ष
तिविरहात्· न च तत्त्वज्ञानिनां वासनोत्पादवारणाय वासनांप्रत्येवा घ तत्त्वज्ञानप्रागभावत्वेन हेतु
त्वमावश्यकमिति वाच्यं। मिथ्याज्ञानरूपकारणविरहेणैव तत्त्वज्ञानिनां वासनानुत्पादात्· मिथ्या
ज्ञानं प्रत्यपि वासनांतरस्य हेतुतयाऽनुत्पन्नतत्त्वज्ञानस्य मिथ्याज्ञानानुत्पादादिति यत्तु· आत्म
विशेषगुणानां क्षणिकतावारणाय विभुसमवेतयोग्यविशेषगुणनाश्यत्वावच्छिन्नं प्रति स्वानंतरो
त्पन्नगुणस्य हेतुता वाच्या। तत्र च तादृशगुणत्वेन हेतुत्वं न संभवति स्वत्वाननुगमात्· अतः पू
र्वत्वसंबंधेन सत्त्वेन गुणत्वेन वा हेतुता वाच्या। स्वपूर्वत्वं च न स्वोत्पत्तिक्षणवृत्तिध्वंसप्रतियोगिस
मयवृत्तित्वं· उत्पत्त्यादेरननुगतत्वात्· किंतु कालिकविशेषणतया प्रागभाववत्त्वं इत्येतादृशयुक्त्या
प्रागभावः सेत्स्यतीति। तदप्यसत्· प्रतियोगितासंबंधेन तादृशनाश्यत्वावच्छिन्नं प्रति स्वप्रतियोगि
सत्त्वसंबंधेन तत्त्वेन हेतुताकल्पनात्· पदार्थमात्रस्यैव क्षणिकतावारणासंभवात्· ज्ञानानंतरोत्पन्नस्य



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रा०व्या
५

विशेषगुणस्य योग्यविशेषगुणनाशकत्वानभ्युपगमात्। यत्तु प्रागभावानभ्युपगमे पाकजरूपरस
गन्धस्पर्शानां सामग्रीभेदाभावाद् भेदापत्तिः। सामग्र्यभेदस्य कार्याभेदप्रयोजकत्वात्। प्रागभावहेतु
त्वे तु स्वप्रागभावस्य स्वसामग्रीघटकतया तद्भेदादेव सामग्रीभेद इति। तदप्यसत्। रूपरसादिकं
प्रति रूपरसात्यंताभावस्य हेतुत्वात् तद्भेदेनैव सामग्रीभेदात्। न च रसात्यंताभावस्य रूपादिहेतुताया
मादायविनिगमनाविरह इति वाच्यं। तेजःसंयोगरसाद्यभाववत्त्वेन रूपाद्युत्पादानंतरं रूपाद्युत्पत्ति
वारणाय तत्र रूपाद्यभावहेतुताया आवश्यकत्वात्। यत्तु अन्यसत्त्वेन ध्वंसत्वेन कार्यकारणभावे
अन्यत्वानिवेशे निरुक्तस्य साधारणापातात्। निवेशेन भावरूपकमेवेति। तच्चोत्पत्तिमत्त्वं उत्पत्तेर
ननुगतत्वात्। किंतु प्रागभावप्रतियोगित्वं। प्रतियोगितासंबंधेन प्रागभाववत्त्ववैस्कभ यथापि प्रागभा
वस्वीकारस्यावश्यकत्वादिति। तदसत्। प्रतियोगितासंबंधेन ध्वंसवत्त्वनिवेशेनैवोपपत्तेः। प्रागभावनि
वेशानानर्थक्यात्। न च प्रतियोगितासंबंधेन ध्वंसवत्त्वं कालिकसंबंधेन घटत्वादिमत्त्वं वा निवेश्यत इ

राम०
५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्त्वविनिगमनाविरहेणानंतकार्यकारणभावप्रसंगः।प्रागभावत्वादेस्तत्त्वे तु कालिकसं
बंधेन घटादिमत्त्वमादाय विनिगमनाविरहेण नाशंकनीयः अवच्छेदकत्वेनैव प्रागभावसि
द्ध्या तदीयानवच्छेदकतया धर्मिग्राहकमानेन सिद्धत्वादिति वाच्यं।कालिकसंबंधेन घटत्वादिम
त्त्वस्य महाकालसाधारणतया निरुक्तव्याप्तत्वविरहेण तन्निवेशमादाय विनिगमनाविरहस्य
तन्मतेप्यप्रसक्तेः। अत्राहुः स्वानधिकरणपातंत्वादेः पटाद्युत्पत्तिवारणाय तत्तत्पटत्वावच्छिन्नप्रति
तत्तत्प्रागभावत्वेन हेतुता स्वीकरणीयेति प्रागभावसिद्धिः।नचतंत्वंतरे पटत्वावच्छिन्नोत्पत्तौ इ
ष्टापत्तिः।पटांतरस्यैवात्रोत्पत्तेः।तत्तत्पटत्वावच्छिन्नस्य नापत्तिः संभवति।इदंत्वाधर्मस्यैकस्य
चिज्जन्यतानवच्छेदकतया आपादकाभावात्।तंत्वादेश्च पटत्वावच्छिन्नं प्रत्येव जनकत्वादिति
वाच्यं।तत्तत्पटत्वादेः कार्यमात्रवृत्तितया कस्यचिज्जन्यतावच्छेदकत्वस्यावश्यमेव स्वीकरणी
यत्वात्।अन्यथा पटत्वादावप्येतथात्वापत्तेः।नचैवं तत्तत्पटत्वावच्छिन्नं प्रति तत्तत्तंतुत्वेन तत्त



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रा०ग०वा
६

त्संयोगत्वेनवाहेतुत्वमभ्युपेयतेततएवतंत्वंतरेपटापत्तिवारणसंभवात्किंप्रागभावेनेतिवा
च्यं।एकैकपटंप्रतिसहस्रादितंतूनांतत्तत्संयोगानांवातत्तद्व्यक्तित्वेनहेतुत्वंकल्पनीयंतदपेक्ष
याएकस्यप्रागभावस्यहेतुत्वंकल्प्यतेलाघवात्‌नचतंतुद्वयेत्रयेवासतितत्रनकथंसहतंत्वा
रब्धपटोत्पत्तिः।तत्रापितादृशप्रागभावसत्वादितितत्तत्तंतूनांतत्संयोगानांवाहेतुत्वकल्पनेप्राग
भावस्वीकारेप्यावश्यकमितिवाच्यं।चरमोत्पन्नसंयोगव्यक्तेःतत्रहेतुत्वकल्पनेनैवत्रिचतुरादि
तंतूत्पत्तौतत्पटोत्पत्तिवारणासंभवेनतावतांतंतूनांतत्तत्संयोगानांचहेतुतायानिष्फलत्वात्‌
नचैवमपितत्पटानधिकरणतंतौतत्पटहेतुभूतचरमतंतुसंयोगाभावादेवनतत्पटापत्तिरिति
वाच्यंःतत्संयोगव्यक्त्यनधिकरणीभूततंतुष्वपितत्पटोत्पादात्तदनधिकरणतंतौतत्संयोग
व्यक्तिविरहस्याकिंचित्करत्वात्‌चरमसंयोगहेतुताचनसमवायेनतदनधिकरणीभूत राम०
तंतुष्वपितत्पटोत्पादेनव्यभिचारात्‌किंतुकालिकप्रत्यासत्त्यातत्पटत्वावच्छिन्नप्रतिकालिक ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्यासत्त्या तद्धेतुता । न चैवमपि कालिकप्रत्यासत्त्या तत्पटादेः स्वोत्पत्तिक्षणेप्युपप
त्तेः । तत्र प्राक्कालावच्छेदेन कारणासत्त्वाद्व्यभिचारो दुर्वार इति वाच्यं । तदुत्पत्तिक्षणे
प्राक्कालावच्छेदेन कारणासत्त्ववत् कारणाभावस्यासत्त्वेन व्यभिचाराच्च कार्या
त् । न च तत्पटसमनियतसंख्याव्यक्तेर्हेतुत्वोपगमे नैवपूर्वानियमापत्तौ किं प्राग
भावहेतुतयेति वाच्यं । नानापुरुषीयापेक्षाबुद्धिसंख्याव्यक्तीनां प्रत्येकहेतुत्वे वि
निगमनाविरहप्रसंगात् । न च नानापुरुषीयापेक्षाबुद्धिजन्ययुगपदुत्पन्नसम
नियतस्याभेदे मानाभावान्नैष दोष इति वाच्यं । एवमपि क्रमोत्पन्ननानासंख्याया हेतुत्वे विनि
गमनाविरहात् । एवं गगनादिसाधारणव्यापकसंख्याव्यक्तीनां हेतुत्वमादाय विनिगमनावि
रहो बोध्यः । गगनादौ तादात्म्यप्रत्यासत्त्या तंत्वादिरूपकारणविरहेण तत्र पटोत्पत्त्यापत्त्यसंभवात् ।
एतेन यावत्तंतुभिन्नभेदस्य तावत्तंतुवृत्तेरखंडस्य हेतुत्वान्नैष दोष इति परास्तं । गगनादिसाधा



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राग०भा
७

रणत्वेदमादाय विनिगमनाविरहापत्तेः। नचतादृशाभेदवत्त्वेन तावत्तन्तूनामेव हेतुत्वमुपेयते। नचव्या
पकभेदवत्त्वेन हेतुत्वमादाय विनिगमनाविरहः। व्याप्यधर्मस्य जनकतावच्छेदकत्वे व्यापकधर्मस्या
न्यथासिद्धिनिरूपकत्वादिति वाच्यं। तत्सरसमनियतभेदव्याप्तिसेन तन्तूनां गगनादिसाधारण
भेदस्य तत्त्वेन वा हेतुत्वे तादृशविनिगमनाविरहस्य तावतापि वारणासंभवात्। नचतावत्तन्तु
वृत्तिजातिविशेषस्वीकारस्य तावता विजातीयतन्तुत्वेन हेतुत्वोपगमाभेषदोषइतिवाच्यं। ता
दृशतन्तूनां कतिपयैस्तन्तुभिस्सह घटितैर्यत्र पटान्तरमारब्धं तत्र पटान्तरजनकतावच्छेदककोटौ वैजा
त्या उभयपटारंभकतन्तुषु सांकर्येण जातिकल्पनाया अन्याय्यत्वात्। तस्माद्देशनियमाय
प्रागभावस्वीकार आवश्यकः। अथैवमपि द्वितन्तुकपटादिस्थूलप्रागभावस्वीकारो निरर्थकः।
तत्र तदारंभकसंयोगव्यक्तेरेव हेतुत्वेनैव भेदनियमोपपत्तेः। नचतत्संयोगस्यतन्त्वोवहितुत्वे राम०
विनिगमनाविरहप्रसंगइतिवाच्यं। तंतुद्वयहेतुत्वापेक्षया एकसंयोगस्यहेतुतायालाघवस्य ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वविनिगमकत्वात्। न च तंत्वोः प्रत्येकहेतुत्वमादाय विनिगमनाविरह इति वाच्यं।
प्रत्येकहेतुत्वे तदितरतंताविवृत्तदनधिकरणतंतावपि तत्पटोत्पत्त्यापत्तेः। एवं च कु-
२क तंतुस्थले विपञ्चप्राथमिकसंयोगस्तदनंतरे च तदितरतत्पटानुकूलक्रियावत्संयोगोत्प-
त्तिर्युगपत्तत्प्रथमसंयोगानंतरं एतत्पटोत्पत्तिवारणाय तदुत्तरोत्पन्ननिखिलसंयो-
गानां विनिगमनाविरहेण हेतुताया आवश्यकत्वात्। एवं कुसंयोगव्यक्तेरपि हे-
तुत्वकल्पने नैवदेशानियमोपपत्तेः। प्रागभावस्वीकारो निरर्थकः। न च तत्संयोगा-
नधिकरणतंतावपि तत्पटोत्पादेन व्यभिचारात् कालिकप्रत्यासत्त्यैव हेतुतायाः स्वी-
करणीयतया न तंतोर्देशानियमोपपत्तिरिति वाच्यं। क्रियासंयोगस्थलेऽवकार्यतावच्छे-
दकावच्छिन्नयत्किंचिद्वृत्तित्वाधिकरणयावद्व्यक्तिवृत्तित्वसंतानाभावप्रतियोगितावच्छेदके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नेदकूटवद्धर्मवत्त्वरूपव्यापकतायाएवकारणतात्वादीरेनिवेशनीयतयातस्याधिकरणा
यत्किंचिद्व्यक्तोतत्संयोगत्वावच्छिन्नाभ्रेहेतोभावसत्वेपिक्षतिविरहात्॥ अथ येतत्त्वसंयो.
गाधिकरणवृत्तित्वविशिष्टसमवायस्यैवतंतोत्संयोगनिरूपितकार्यतावच्छेदकसंबं
धताभ्युपगमान्नोक्तानुपपत्तिः। नचपटविशेषाहेप्रागभावहेतुत्वेसिद्धेयच्छिशेषपयो
रित्यादिनियमेनजन्यतावच्छिन्नंप्रतिप्रागभावत्वेनहेतुत्वमावश्यकमितिच्छितंतुप
टेपितत्सिद्धिरितिवाच्यं। तादृशनियमेमानाभावादितिचेन्नेष्यलएवतादृशस्थ
लेप्रागभावःस्थलविशेषेऽस्यसेवेति। अत्रचेतादृशयुक्त्यासिद्धस्यप्रागभाव
स्यस्वप्रतियोगिकसाहोमानाभावइतिचिंतनीयं। वस्तुतस्तुजन्यज्ञानादिइति
श्चात्ममनोयोगादिनिरूपितकार्यतायांप्रतियोगितासंबंधेनप्रागभावत्वरूपजन्य

राम
८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावच्छेदकतायाः आवश्यकतया प्रागभावः संभवति। तत्र प्रतियोगितासंबंधे
न ध्वंसवत्त्वनिवेशोपि कालिकसंबंधेन घटत्ववत्त्वनिवेशात् नादाय विनिगमनाविरहप्र
संगात्। तत्र ज्ञानत्वादिनिवेशस्यावश्यकतया महाकालसाधारण्याभावात्। न चैका
लिकविशेषणतासमवायोभयसंबंधेन ज्ञानत्वमेव जन्यतावच्छेदकं तथा च जन्यता
वच्छेदकस्य निससाधारण्याभावात्। न तत्र प्रागभावनिवेशो नास्तिकधंकार्यतावच्छेद
ककोटिप्रविष्टतया प्रागभावसिद्धिरिति वाच्यं। उभयसंबंधस्यावच्छेदकतावच्छेदक
त्वे उभयत्वेन प्रत्येकरूपेण वा नाद्यः। उभयत्वस्य दुर्वचत्वात्। संख्यात्मकस्य तस्य स
मतायां पर्याप्तेः न चापेक्षाबुद्धिविशेषविषयत्वं तत्। बुद्धिविशेषस्यैव दुर्वचत्वात्। ना
न्त्यः। अननुगमात्। स्यं तु कालिकविशेषणताविशिष्टसमवायसंबंधेन ज्ञानत्वस्य



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रा०वा०
९

वच्छेदकत्वान्नैषदोषइति तन्न कालिकविशेषणतायाःवैशिष्ट्यसमवायैसंबंधेनवक्तव्यं केन
सामानाधिकरण्येनेतिचेत्ताहि घटत्वादिविशिष्टसमवायस्यैवतथात्वमायविनिगमनावि
रहः नचसामानाधिकरण्यसंबंधेनकालिकविशेषणताविशिष्टज्ञानत्वमेवकार्यतावच्छेदक
वक्तव्यमितिवाच्यं· ज्ञानस्यज्ञानत्वादिनिष्ठकालिकसंबंधघटितघटत्वादिसामानाधिक
रण्यनिरूपकत्वात्तस्यघटत्वादिविशिष्टज्ञानत्वमादायविनिगमनाविरहसंभवात्· नच
विषयताघटितसामानाधिकरण्यसंबंधेनघटत्वादिविशिष्टज्ञानत्वे निस्सज्ञानेपि वर्त्तत इ
तिसामानाधिकरण्यसंबंधेनघटत्वविशिष्टज्ञानत्वस्यनेननिस्सव्यावर्त्तत्वमितिवाच्यं। कालिकसं
बंधावच्छिन्नस्याधिकरणतावच्छिन्नत्वरूपसामानाधिकरण्यस्यैवनिवेशनीयत्वात्· विषयतासं राम०
बंधघटितसामानाधिकरण्येनकालिकविशेषणताविशिष्टज्ञानत्वस्यापिनिस्साधारणतयासं ९
बंधविशेषनिवेशस्यभवतोप्यावश्यकत्वात्· केचित्तु केवलनिलाद्यवयवारब्धस्थलेचित्ररूपवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रणायचित्रत्वावच्छिन्नं प्रतिपटभावहेतुतापेक्षायाश्चित्रप्रागभावहेतुतायाः कल्पयितु
मुचितत्वात्प्रागभावसिद्धिः । ननु चयत्रपाकादिना नित्यादिना त्वानंतरं अवयवेषु नानाजा
तीयरूपोत्पत्त्या चित्रमुत्पद्यते । तत्र प्रागभावस्यावश्यंस्वीकारणीयत्वात् नीलाद्युत्
त्तिदशायामपि चित्राद्युत्पत्तिवारणाय पटभावहेतुत्वस्यावश्यकत्वे किं प्रागभावहे
तुतयेति वाच्यं । तत्र पाकाधीनावयवांतरारंभावैयर्थ्येति चित्ररूपस्यैवोत्पादाभ्युपग
मेन नीलघटे चित्रप्रागभावानंगीकारात् इत्याहुः ॥७॥ परे तु ॥ धूमलिंगकानुमि
तित्वावच्छिन्नं प्रति धूमपरामर्शत्वादिना हेतुत्वेपि स्ववृत्तिप्रागभावप्रतियोगित्वस्व
वृत्तित्वोभयसंबंधेन धूमपरामर्शवत्वादिरूपधूमलिंगकत्वस्य कार्यतावच्छेदक
कोटौ निवेशादन्यविध धूमादिलिंगकत्वस्य दुर्वचत्वात्प्रागभावस्वीकार आवश्यकः ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रा० वी०
१०॥

एतेन प्रागभावस्य प्रतियोग्युत्पत्तिक्षणविनाशित्वम् प्रामाणिकमिति परास्तं । प्रतियोग्युत्पत्तिक्ष
णे प्रागभावसत्त्वे वह्निव्याप्यधूमवान् पर्वतो वह्निमांश्चेत्याकारकसमूहालंबनात्मकान्यलिंग
कानुमितेरपि तादृशोभयसंबंधेन परामर्शादिमत्वप्रसंगात् । एवं प्रागभावानंगीकारेऽनु
मितिसामग्र्यादीनां सिद्ध्यभाववाधाभावादिविशिष्टपरामर्शत्वादिप्रतिबंधकतावाच्या ॥
तत्र च तादृशास्तामस्यविशेषणविशेष्यभावविनिगमनाविरहेण प्रतिबंधकत्वानंत्यापत्तेः ॥
तदभ्युपगमे च सिद्ध्यभाववाधाभावपरामर्शादिकमनिवेश्य स्वध्वंसवत्प्रतियोगिकत्वसंबंधेन
स्वतिविशिष्टानुमितिप्रागभावत्वेनैव प्रतिबंधकताकल्पने तु इति लाघवं । तादृशसंबंधेन
स्वतिविशिष्टः स च प्रागभावः प्रतियोग्यव्यवहितपूर्वक्षण एव वर्तत इति न काप्यनुपपत्तिः ॥
यत्तु तत्तज्ज्ञानस्य चरमदुःखध्वंसत्वरूपमुक्तिं प्रति जन्यतावच्छेदकं । चरमत्वं च दुःखनिष्ठान गराम ॥
जातिः । गोवधादिजन्यतावच्छेदकजातिभिः सांकर्यप्रसंगात् किंतु स्वसामानाधिकर १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पर्यावच्छिन्नकालिकत्वविशेषणतासंबंधेनतुः स्वप्रागभाववदन्यत्वंतदिति प्रागभावस्वीका
रआवश्यक इति। तदसत्। स्वसामानाधिकरण्यावच्छिन्नकालिकविशेषणतासंबंधेनतुः
स्ववदन्यत्वस्य ध्वंसस्येति वेन्नादे वेदानी तन्तुः स्वध्वंसेव्यभिचारवारणसंभवात्। नचारणा
यतुः स्वचरमत्वनिवेशस्यवैफल्यमादिति॥ ७॥ इति प्रागभावविचारः समाप्तिमगात्॥ ७॥ ६



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ प्रागभाव समाप्तः ॥

KKSU LIBRARY
RAMTEK
441 106
M-1615
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.09.20 15:09
,TRANSFERRED=2020/09/23 at 15:12:27
,PAGES=20
,TYPE=STD
,NAME=S0003678
,Book Name=M-1615-PRAGBHAV VICHAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection